 कुण्ड

यथास्तत्कर्म्मविशेषे द्रष्टव्यानि । अथैकहस्ताद्दशहस्तान्तं यावत्कुण्डेषु भुजकोटिमानम् “वेदाक्षोणि युगाग्नयःशशियुगान्यष्टाब्धयस्त्रोषवोऽष्टाक्षावक्षिरसारसाङ्कमिता नेत्रर्षयोऽक्षस्वराः । अङ्गुल्यो, ऽथ यवाः खमभ्रमिषवः खं पञ्चषट् सागराः सप्ताभ्रं मुनयस्त्वमी निगदिता वेदास्त्वके बाहवः” । एकहस्ते कुण्डे चतुर्विंशत्यङ्गुलान्यायामविस्तारौ, द्विहस्ते चतुस्त्रिंशदङ्गुलानि । इमानि पादोनलिक्षाचतुष्टयन्यूनानि अल्पान्तरत्वात् पूर्णान्येव धृतानि । त्रिहस्ते एकचत्वारिंशदङ्गुलानि । चतुर्हस्ते अष्टचत्वारिंशदङ्गुलानि । पञ्चहस्ते पञ्चयवाधिकानि त्रिपञ्चाशदङ्गुलानि । षड्ढस्ते त्रिपदोनैकोनषष्टिः, सप्तहस्ते सार्द्धत्रिषष्टिः। अष्टहस्ते यवोना सप्तषष्टिः । नवहस्ते द्विसप्ततिः दशहस्ते यवोना १षट्सप्ततिरिति षोडशहस्ते षण्णवतिः चतुर्भुजे कुण्डे भुजाउक्ता इति व्याख्या । अत्रोपपत्तिः एकहस्तस्य चतुर्विंशत्यङ्गुलात्मकस्य भुजकोटिघातः क्षेत्रफलं तच्च षट्सप्तत्यधिकपञ्चशती५७६ । एतत्पदमेकहस्तक्षेत्राङ्गुलानि चतुर्विंशतिः। एवं क्षेत्रफलस्य द्व्यादिगुणस्य मूलं चतुस्त्रिंशदाद्यङ्गुलानि भवन्ति । अथयोनिनिवेशनम् “कुण्डत्रयी दक्षिणयोनिरैन्द्र्याः सौम्याग्रका स्यादितराणि पञ्च । पश्चाद्भगानीन्द्रदिगग्रकाणि योनिर्न कोणे न च योनिकुण्डे” ऐन्द्र्याः प्राच्या आरभ्य कुण्डत्रयो चतुरस्रयोनिवृत्तार्द्धरूपा दक्षिणयोनिः स्यात् उत्तराग्रा अर्थाद्धोता उदङ्मुखः। इतराणि पञ्च कुण्डानि त्र्यस्रवृत्तषडस्रपद्माष्टास्राणि प्रत्यग्योनीनि प्रागग्राणि अर्थाद्धोता प्राङ्मुखः । नवममपि कुण्डं दक्षिणयोन्युदगग्रम् । योनिः कोणे योनिकुण्डे च न कार्य्येति व्याख्या। स्वायम्भुवे “प्रागग्नियाम्यकुण्डानां प्रोक्ता योनिरुदङ्मुखी । पूर्व्वमुखा स्थिताः शेषाः यथाशोभं व्यवस्थिताः” इति । त्रैलोक्यसागरे “नवमस्यापि कुण्डस्य योनिर्दक्षदले स्थितेति” अन्यत्र “नार्पयेत् कुण्डकोणेषु योनिं तान्त्रिकसत्तमः” इति “योनिकुण्डे तथा योनिं, पद्मे नाभिं विवर्जयेदिति”। अथ सर्वेषां कुण्डानां प्रकृतिभूतं चतुरस्रमाह “द्विघ्नव्यासन्तूर्य्यचिह्नं सपाशं सूत्रं शङ्कौ पश्चिमे पूर्व्वगेऽपि। दत्त्वाकर्षेत् कोणयोः पाशतुर्य्यं स्यादेवं वा वेदकोणे समानम्” । इष्टव्यासाद् द्विगुणितं व्यासं चतुर्थांशकृतचिह्नं सपाशं सूत्रं पूर्व्वपश्चिमस्थयोः शङ्क्वोर्दत्त्वा दक्षिणोत्तरसूत्रमध्ये यथामध्यचिह्नं भवति तथा कोणयोः पाशाच्चतुर्थांशे आकर्षेत् एवमन्यतोऽपि। एवं कृते समचतुरस्रं स्यात् इदमेव सर्वेषां कुण्डानां मूलमिति व्याख्या। उक्तं च “चतुरस्रमिदं प्रोक्तं सर्वकुण्डेषु कारणमिति” अत्र “समश्रुतौ तुल्यचतुर्भुजे च तथाऽऽयते तद्भुजकोटिघातः” क्षेत्रफलं षट्सप्तत्यधिकपञ्चशती ५७६ एतावदेव योन्यादिकुण्डेषु एकहस्तेषु यथा क्षेत्रफलं सम्पद्यते तथा यतितव्यमिति। अथ योनिकुण्डमाह “क्षेत्रे जिनांशे तु पुरःशरांशान् संवर्ध्य च स्वीयरदांश३२ युक्तान्। कर्णार्द्धमानेन लिखेन्दुखण्डे प्रत्यक्पुरोऽङ्काद्गुणतोभगाभम्” । चतुरस्रे क्षेत्रे चतुर्विंशतिधा भक्ते सति पञ्चांशान् स्वीयद्वात्रिंशदंशयुक्तान् अग्रे संवर्द्ध्य ततश्चतुर्धा विभक्तस्य क्षेत्रस्य पश्चिमचतुरस्रद्वयमध्याङ्कात् कर्णसूत्रस्य चतुर्थांशेन प्रत्यक्पश्चिमभागे इन्दुखण्डे वृत्तार्द्धद्वयं विद्वन् । लिख । ततः पूर्वाङ्काद्दक्षिणोत्तरसंलग्नं वृत्तार्द्धं यावद्दीयमानगुणद्वयतो भगाकारं योनिकुण्डं स्यादिति व्याख्या । अथ क्षेत्रफलानयनम् अत्र क्षेत्रत्रयं पूर्व्वाङ्काद्दक्षिणोत्तरसूत्राग्रं यावद्दीयमानसूत्रद्वयं त्रिकोणमेकं, तथा दक्षिणोत्तरसूत्राग्रात्पूर्वापरसूत्रान्तं यावद्दीयमानसूत्रद्वयादपरं त्रिकोणम् उभयवृत्तार्द्धे मिलित्वा एकं वृत्तमिति तृतीयं, क्षेत्रत्रयफलयोगे पूर्णफलम् तत्र प्रथमस्य क्षेत्रफलं यथा अत्र लम्बः अङ्गुलानि १७ यवः१यूका२ । भूः२४ “लम्बेननिघ्नं कुमुखैक्यखण्डमिति” । अत्र मुखाभावाद्भूमध्यमेव लम्बेन गुणितं सञ्जातं प्रथमं क्षेत्रफलम् अङ्गुलानि२०५ यवाः ७ । अथापरस्य लम्बः १२ भूः सैव अत्रापि तथैव रीत्या क्षेत्रफलं १४४। अथ वृत्तार्द्धयोरेकं वृत्तं तत्फलं यथा तत्र वृत्तव्यासः१६,७,४,१ “व्यासस्य वर्गे भनवाग्निनिघ्ने सूक्ष्मं फलं पञ्चसहस्रभक्ते” इति व्यासवर्गः २८८ ० । ० । २ । अयम्भनवाग्नि ३९२७ निघ्नः पञ्चसहस्र ५०००भक्तोजातं क्षेत्रफलं वृत्तस्य ११६।१ । ४ । ५। त्रयाणां योगे क्षेत्रफलं पूर्णं ५७६।० । ४ । ५ । अत्र लिक्षापञ्चकं यूकाचतुष्टयञ्चाधिकम् अल्पान्तरत्वाददोषः। ध्वजायसिद्धिश्चान्यत्रोक्ता। “स्थापने सर्व्वकुण्डानां ध्वजायः सर्वसिद्धिदः। शतांशेनाधिकं हीनं ह्रासवृद्धी न दूषयेत् । आयदोषविशुद्ध्यर्थं क्रियते शास्त्रकोविदैरिति” । एतत्क्षेत्रस्योत्तराग्रत्वात् उदीचीप्राचीवद्व्यवहर्त्तव्या एवमन्ययोरपि । पदार्थादर्शे “चतुर्विंशतिधा मध्यसूत्रं भक्त्वा पुरोन्यसेत्। पञ्चांशान् वैककस्य त्रीन्विंशांशान् कोणपादतः। वृत्तार्द्धे स्तो मध्यतिर्यक्सूत्रान्तञ्च ततोऽर्पयेत् । पुरो वर्द्धितसूत्रान्तं, सूत्रे द्वे स्याद्भगाकृतिरिति”